पोप्लुषकः-षिका ; प्लोषिता-त्री, प्लोषयिता-त्री, पुप्लुषिषिता-पुप्लोषिषिता-त्री, पोप्लुषिता-त्री ; इत्यादीनि सर्वाणि रूपाणि दैवादिककुप्यतिवत् (224) बोध्यानि । [A]प्लुष्यन् इति शतरि रूपम् ।

## (1084) " प्लुष स्नेहनसेवनपूरणेषु "

(IX-क्र्यादिः-1528. सक. सेट्. पर.)

'—मोहनदाहनयोरप्याह शङ्करः ।' इति धा. का. (3-12.)। 'सेचन—' इत्यपि कुत्रचिद् दृष्टः पाठः ।

'प्लोषति प्लुष्यतीति स्तां, प्लुष्णाति स्नेहनादिषु ।' (श्लो. 172) इति देवः। प्लोषकः-षिका, प्लोषकः-षिका, पुप्लोषिषकः-पुप्लुषिषकः, पोप्लुषकः-षिका; प्लुष्णन्-ती इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि। निष्ठायाम्-[B]प्लुषितम्-तः, इति एकमेव रूपमिति विशेषः ।

## (1085) " प्लुषु दाहे " (I-भ्वादिः-704. सक. सेट्. पर.)

'.....................दाहकर्मणि ॥ प्लोषति, प्लुष्यतीति स्तां, प्लुष्णाति स्नेहनादिषु ।' (श्लो. 171-172) इति देवः ।

प्लोषकः-षिका, प्लोषकः-षिका, पुप्लोषिषकः-पुप्लुषिषकः-षिका, पोप्लुषकः-षिका; [1]प्लुष्टः[C], इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि ।

## (1086) " प्सा भक्षणे " (II-अदादिः-1055. सक. अनि. पर.)

प्सायकः-यिका, प्सापकः-पिका, पिप्सासकः-सिका, पाप्सायकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि आदादिकदाप्-धातुवत् (833)

---

1. उदित्त्वेन क्त्वायामिड्विकल्पनात् निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः। ष्टुत्वम् ।

A. 'तं प्लुष्यद् दृष्टिनृत्यद्वृषमपि च गतत्रासमुत्कुथ्यदङ्गं........॥' धा. का. 2.56.

B. 'प्रुष्णन् सतां प्रियमयं प्लुषिताङ्गरागः
पुष्णन् मुदं मृगदृशां रिपुधाम मुष्णन् ।' धा. का. 3.12.

C. '......प्रोष्यान् प्लुष्टजनान् कृपामृतपृषद्वर्षी भवान् दानवान् ।' धा. का. 1.88.